## श्रीसुरसरस्वतीसभा, शृङ्गेरी
## तृतीया परीक्षा – प्रथमपत्रिका

**दिनाङ्कः – 30–08–2020** **प्रातः 10:00 तः 1:00 पर्यन्तम्**

**समयः – होरात्रयम्** **अङ्काः – 100**

**1. पञ्चानां प्रश्नानां संस्कृते एकवाक्येन उत्तरं लिखत ।** **5**

1. काञ्चनमाला का ?
2. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किम् अपश्यत् ?
3. सुमतिः कस्य अमात्यः ?
4. व्याधः कथम् आसीत् ?
5. मलयालदेशस्य राजा कः ?
6. तारकेण विप्रकृताः देवाः कुत्र ययुः ?

**2. षण्णां प्रश्नानाम् उत्तरं द्वित्रैः वाक्यैः संस्कृते लिखत ।** **12**

1. नव गोप्यानि कानि ?
2. शुकशावकौ कुत्र न्यवसताम् ? तयोः नाम किमासीत् ?
3. गणेशं के नमस्कुर्वन्ति ? कदा नमस्कुर्वन्ति ?
4. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किम् चिन्तितवान् ?
5. आर्यः अनार्यः च कथं पततः ?
6. द्रोणः एकलव्यं शिक्षयितुम् अनिच्छन् किमवदत् ?
7. पञ्चतन्त्रं केन लिखितम् ? पञ्चतन्त्राणि कानि ?

**3. त्रयाणां प्रश्नानाम् उत्तरं पञ्चषैः वाक्यैः संस्कृते लिखत ।** **9**

1. गृहिणी द्विजं किमवदत् ?
2. मल्लस्य सामर्थ्यं विशदयत ।
3. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?
4. श्रीशङ्कराचार्यः कुत्र कदा अवततार ? तस्य पितरौ कौ ? तस्य प्रसिद्धाः शिष्याः के ?

**4. चतुर्णां प्रश्नानाम् उत्तरं दशभिः वाक्यैः मातृभाषया लिखत ।** **12**

1. किमर्थं सर्वेऽपि कवयः कालिदासमेव कविचक्रवर्तिनम् अमन्यन्त? विवृणुत ।
2. 'पञ्चतन्त्रकथामुखम्' इति पाठस्य सारांशं लिखत ।
3. 'पतिव्रतायाः माहात्म्यम्' इति पाठं विशदयत ।
4. ब्राह्मणः सर्पश्च इति कथां सङ्गृह्य लिखत ।
5. देवैः कृतं ब्रह्मणः स्तुतिं पाठोक्तरीत्या विशदयत ।

**5. चतुर्णां सन्दर्भं मातृभाषया विवृणुत ।** **12**

1. सर्वथा अविचार्य कर्म न कर्तव्यम् ।
2. तत्र भवद्भिः सन्निहितैः भवितव्यम् ।
3. जरारोगवर्जितो वज्रकायो भविष्यति ।
4. अतिथिसत्कारः श्रेयस्करः
5. न हि किञ्चित् गुरवे अदेयम् ।

**6. द्वयोः अन्वयानुसारम् अर्थम् मातृभाषया लिखत ।** **4**

1. अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
   वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥

2. रक्षादीपितलाङ्गूलः स तु लङ्कामशेषतः
   दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ॥

3. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
   तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ॥

**7. श्लोकद्वयं पूरयत ।** **4**

1. रविनिशाकरयोः___मे मतिः ॥ 2. शान्ताकारं____नाथम् ॥ 3. निन्दन्तु ____ न धीराः ॥

**8. अस्य गद्यस्य अनुवादं कुरुत ।** **3**

तदाकर्ण्य विस्मिताः सर्वे प्रतिनिवृत्य सर्वमुदन्तं द्रोणाय गुरवे निवेदयामासुः । अर्जुनस्तु रहसि द्रोणसन्निधिमागत्य "गुरो तत्र भवता तु – "त्वां लोकोत्तरं धनुर्धरं करिष्यामि" इत्यभिहितम् । इदानीं तु अरण्ये भवदन्तेवासी मत्तोऽपि अस्त्रविद्याकुशलतरः एकलव्यो निवसति । कथमेतत् ?" इत्यपृच्छत् ।

**9. रिक्तस्थानानि पूरयत ।** 3

1. नास्ति तेषां यशःकाये ______ भयम् । 2. न पराभवमाप्नोति _____ कदाचन ।
3. यद्दत्वा च ________ भवेत् ।

**10. त्रयाणां पर्यायपदानि लिखत ।** 3

1. आस्यम् 2. तुराषाट् 3. वियत् 4. नतिः

**11. त्रयाणां विरुद्धपदानि लिखत ।** 3

1. द्राक् 2. उपक्रमः 3. श्वेतः 4. बहिः

**12. त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

1. तर्हि 2. वेत्सि 3. दृष्ट्वा 4. नमः

**13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** 3

1. उभावपि 2. गिरिरयम् 3. कदाचिदपि 4. यन्मम

**14. त्रयाणां वाक्यदोषं परिहरत ।** 3

1. लघुपतनकः मूषकेन सह मैत्रीं इच्छन्ति ।
2. नारिकेलाः नराणां जलं ददाति ।
3. संस्कृतसाहित्ये अनेके सुभाषितानि सन्ति ।
4. त्वं पाठं पठतु ।

**15. सुबन्त तिङन्ताव्ययानि पृथक् कृत्वा लिखत ।** 3

1. अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत । ( द्वे एव )** 4

1. प्रक्षालनात् ________ वरम् ।
2. क्लेशः ________ विधत्ते ।
3. उद्योगिनं _________ लक्ष्मीः ॥

17. संयोज्य लिखत । 4

| अ | आ |
| --- | --- |
| 1. नमति | अ) कर्मणि |
| 2. नमस्ते | आ) कृदन्तः |
| 3. नम्यते | इ) सकारादेशः |
| 4. नमोऽस्तु | ई) परस्मौपदि |
| | उ) उकारादेशः |

18. व्याकरणविशेषं लिखत । 2

1. विषादं मा कृथाः  2. कपोतराजः

19. रेखाङ्कितपदमाधृत्य प्रश्नवाक्यं रचयत । 2

1. ***गतक्रोधः*** कौशिकः मिथिलानगरीम् अगच्छत् ।
2. अस्मिन् ग्रन्थे ***पञ्च*** तन्त्राणि सन्ति ।

20. समूहेतरपदं पृथक् कृत्वा लिखत । 2

1. पठति, भवति, वियति, वन्दते ।
2. बहुशक्तिः, उग्रशक्तिः, अमरशक्तिः, अनन्तशक्तिः ।

21. चतुर्थं पदं लिखत । 2

1. राजा – घृणी :: ब्राह्मणः -------।
2. रामः – साधवे :: दुर्मुखः _______।

22. प्रयोगपरिवर्तनं कुरुत । 2

1. त्वया लिख्यताम् दिवसः ।  2. नाहं विद्याविक्रयं करोमि ।

* * *